**विद्या भवन बालिका विद्यापीठ लखीसराय**

**वर्ग नवम् विषय संस्कृत शिक्षक श्यामउदय सिंह**

**ता: -२५/०७/२०२० (एन.सी.ई.आर.टी.पर आधारित प्रश्न)**

अधोलिखितं गद्यांशं पठित्वा तदाधारितानां प्रश्नानां उत्तराणि लिखत – कस्मिंश्चित् ग्रामे कदाचन् अशीतिवर्शीय: एको वृद्ध: मार्गे आम्रवृक्षान् आरोपयति स्म।तं दृष्ट्वा महानगरात् आगच्छन् कश्चन् युवा पृष्टवान् -भो महानुभाव! तव अवस्था प्रायश:अशीतिवर्षीया प्रतीयते।एतत् च स्वाभाविकं यदा ते वृक्षा: फलानि दास्यन्ति, तथा त्वं जीवितो न भविष्यसि।अत: किमर्थम् इमं निष्फलं प्रयासं करोषि? स उक्तवान्- मया साम्प्रतम् इतरै: आरोपितानां वृक्षाणां फलानि खाद्यन्ते।एवं मयापि आरोपितानाम् एतेषां वृक्षाणां फलानि आगामिभविष्यत्काले लोका: खादेयु: -इत्येतदर्थम् अहम् एतेषाम् आरोपणं करोमि।वस्तुत: मनुष्येण केवलं स्वार्थचिन्तनं न कर्तव्यम्।

(१) एकपदेन उत्तरत-

(क) कश्चन् युवा कुत: आगच्छति स्म ?

(ख) मनुष्येण केवलं किं न कर्तव्यम् ?

(२) पूर्णवाक्येन उत्तरत-

(क)वृद्ध:किं विचार्य वृक्षानाम् आरोपणं करोति स्म ?

(ख) युवा तं वृद्धं किम् अपृच्छत् ?

(३) भाषिककार्यम्-

(क)'आरोपयति स्म' इति क्रियापदस्य कर्तृपदं किम्?

(ख) 'प्रयासम्' इत्यस्य किं विशेषणपदम् अत्र प्रयुक्तम्?

(ग)' अधुना ' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(४) **अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**